# श्री कृष्णाष्टक स्तोत्रं

पालयाच्युत पालयाजित पालया कमलालय।
लीलया धृत भूधरांबुरुहोदर स्वजनोदर ॥ ध्रुव ॥
मध्वमानसपद्मभानुसमं स्मर प्रति संस्मर
स्निग्धनिर्मलशीतकांतिलसन्मुखं करुणोन्मुखं।
हृद्यकंबुसमानकंधरमक्षयं दुरितक्षयं
स्निग्धसंस्तुत रूप्यपीठकृतालयं हरिमालयं ॥ १ ॥
अगंदादिसुशोभिपाणियुगेन संक्षुभित्यॅनसं
तुंगमाल्यमणींद्रहारसरोरसं खलनीरसं।
मंगलप्रदमंथदामविराजितम भजताजितं
तं गृणे वररूप्यपीठकृतालयं हरिमालयं ॥ २ ॥
पीनरम्यतनूदरं भज हे मनः शुभ हे मनः
स्वानुभावनिधर्शनाय दिशंतमर्थि सुशंतमं
आनतोऽस्मि निजार्जानप्रियसाधकं खलबाधकं
हीनतोज्झित रूप्यपीठकृतालयं हरिमालयं ॥ ३ ॥
हैमकिंकिणिमालिकारसनांचितं तमवंचितं
रत्नकांचनवस्त्रचित्रकटिं घनप्रभया घनं।
कम्रनागकरोपमोरुमनामयं शुभधीमयं
नौम्यहं वररूप्यपीठकृतालयं हरिमालयं ॥ ४ ॥
वृत्तजानुमनोज्ञजंघममोहदं परमोहदं
रत्नकल्पनखत्विषा हृतहृत्तमस्तुतिमुत्तमं।

प्रत्यहं रचितार्चनं रमया स्वया गतया स्वयं
चित्त चिंतय रूप्यपीठकृतालयं हरिमालयं ॥ ५ ॥
चारुपादसरोजयुग्मरुचामरोच्चयचामरो
दारमूर्धजभारमंडलरंजकं कलिभंजकं।
वीरतोचितभूषणं वरनूपुरं स्वतनूपुरं
धारयात्मनि रूप्यपीठकृतालयं हरिमालयं ॥ ६ ॥
शुवादिमनोऽतिदूरतरागमोत्सवदागमं
सत्कवींद्रवचोविलासमहोदयं महितोदयं।
लक्षयामि यतीश्वरैः कृतपूजनं गुणभाजनं
धीकृतोपमरूप्यपीठकृतालयं हरिमालयं ॥ ७ ॥
नारदप्रियमाविशांबरुहेक्षणं निजरक्षणं
तारकोपमचारुदीपचयांतरे गतचिंतरे।
धीर मानस पूर्णचंद्रसमानमच्युतमानम
द्वारकोपमरूप्यपीठकृतालयं हरिमालयं ॥ ८ ॥
रूप्यपीठकृतालयस्य हरेः प्रियं दुरिताप्रियं
तत्पदार्चकवादिराजयतीरितं गुणपूरितं।
गोप्यमष्टकमेतदुच्चमुदे मम स्त्विहनिर्मम
प्राप्य शुद्धफलाय तत्र सुकोमलं हृतधीमलं ॥ ९ ॥

॥ इति श्री मद्वादिराजपूज्यचरण विरचितं श्री कृष्णाष्टक स्तोत्रं संपूर्णं॥

www.yousigma.com

॥ भारतीरमण मुख्यप्राणांतर्गत श्री कृष्णार्पणमस्तु ॥

www.yousigma.com